# प्राचीनकालीनशैक्षिकनियमाः

- *डॉ. जि. सूर्यप्रसादः*

-

**शोधसारांशः -**

शिक्षा ज्ञानार्जनाय कल्पिता काचन प्रक्रिया। प्रक्रियायाः अस्याः सुचारुरूपेण सञ्चालनाय नियमाः केचन अत्यन्तम् अपेक्षिताः सन्ति। शैक्षिकनियमानामुल्लेखनं यद्यपि बहुत्र दृश्यते परन्तु धर्मसूत्रेषु धर्मशास्त्रेषु च तेषामुल्लेखनं विशिष्यते। पुनस्तत्रापि धर्मसूत्राणि विशिष्यन्ते धर्मशास्त्राणां धर्मसूत्रानुयायित्वादिति कृत्वा प्रकृते लेखे शैक्षिकनियमाः प्रमुखाः केचन आपस्तम्बधर्मसूत्रस्य, हिरण्यकेशिधर्मसूत्रस्य, बोधायनधर्मसूत्रस्य चाधारत्वेन प्रदर्शिताः।

## परिचयः

जगति प्रतिवर्षं श्रावणपूर्णिमायां संस्कृतदिनमनुपाल्यते। दिनस्यास्य पालने कारणं तावद् विद्यारम्भः शिक्षारम्भः अस्मिन्नेव दिने प्राचीनकाले भवति स्मेति सर्वैः विपश्चितैः मुक्तकण्ठम् अङ्गीक्रियते। को नु खल्वयं विद्यारम्भः शिक्षारम्भो वा? कीदृश्याः विद्यायाः (शिक्षायाः) आरम्भः तस्मिन् दिने जायते स्म? विषयोऽयं सम्प्रति परिशीलयामः। तत्र विद्याः अष्टादशेति उच्यते –

**अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।**
**धर्मशास्त्रं पुराणं तु विद्या ह्येताश्चतुर्दश।।**
**आयुर्वेदो धनुर्वेदः गान्धर्वश्चेति ते त्रयः।**
**अर्थशास्त्रन्तु विज्ञेयं विद्या ह्यष्टदशैव तु।। (विष्णुपुराणम्)**

किं तस्मिन् दिने (श्रावणपूर्णिमायां) सर्वासामप्येतासां विद्यानामारम्भः भवति वा उत कस्याश्चिद् एकस्याः विद्यायाः आरम्भः भवति वेति प्रश्नः समुदेति। प्रश्नस्यास्य उत्तरमिदं भवति यत् भारतीयपरम्परायां वेदानामध्ययनस्यारम्भः विद्यारम्भः शिक्षारम्भः इत्युच्यते। इतश्च वेदशिक्षैव प्रधानशिक्षात्वेन उररीकृतमासीत्तदा। एवं विद्यारम्भो नाम वेदाध्ययनस्यारम्भः, शिक्षा नाम वैदिकी शिक्षा इति सिद्धम्।

वेदस्याध्ययनं ग्रहणाध्ययनं, धारणाध्ययनमिति द्विधा भवति। अनधीतवेदस्य अध्ययनं ग्रहणाध्ययनत्वेन, अधीतवेदस्य अध्ययनं धारणाध्ययनत्वेन ज्ञायते। श्रावणपूर्णिमायाम् उपाकर्मणः अनन्तरं ग्रहणाध्ययनस्यारम्भः भवति स्म। एवं श्रावणपूर्णिमायां अनधीतवेदस्य अध्ययनं प्रतिवर्षं प्रारभ्यते इति कृत्वा विद्यारम्भदिनमिति दिनमिदं सुख्यातं वर्तते। संस्कृतवेदविद्यारम्भदिनमिति तदेव दिनं संस्कृतदिनत्वेन परिपाल्यते। एवं प्राचीनकाले शिक्षारम्भः श्रावणपूर्णिमायां भवति स्म। पुनः शिक्षायाः बहवः विशेषनियमाः अपि भवन्ति स्म। के च ते नियमाः इति सम्प्रति प्रदर्श्यन्ते।

# विषयप्रवेशः

## 1. वैदिकशिक्षायाः अध्ययनसम्बद्धः विचारः

अध्ययनाय गुरुकुलं समागतः ब्रह्मचारी तत्र वेदाध्ययनेन सहैव षडङ्गानां तथान्येषां शास्त्राणाञ्च अध्ययनं करोति। तत्र षडङ्गानाम् अन्येषाञ्च शास्त्राणाम् अध्ययने अनध्ययने च विशेषनियमाः न सन्ति। परन्तु वेदस्य अध्ययने, तत्रापि अनधीतपूर्ववेदस्याध्ययने अनध्ययने च विशेषनियमाः प्रकल्पिताः सन्ति।

वेदस्याध्ययनं ग्रहणाध्ययनं, धारणाध्ययनमिति द्विधा भवतीत्युक्तपूर्वम्। धारणाध्ययनम् आवर्षं सर्वदापि कर्तुं शक्यते। ग्रहणाध्ययनं तु वर्षे पञ्चसु मासेष्वेव करणीयं भवति। ग्रहणाध्ययनं तावद् वर्षे पञ्चमासान् यावदेव (श्रावणपौर्णमासीमारभ्य पौषपौर्णमासीं यावत्) कार्यमिति धर्मसूत्रेषु सूच्यते। सोऽयं कालः ऋतुशब्देनाभिधीयते। अर्थात् पञ्चमासपर्यन्तं अनधीतवेदाध्ययनं कृत्वा, ततः शिष्टेषु सप्तसु मासेषु धारणाध्ययनं तथा षडङ्गानां शिक्षाव्याकरणादीनाम् अन्येषां शास्त्राणाञ्चाध्ययनं ब्रह्मचारी करोति स्मेति ज्ञायते। सम्प्रति अस्य वेदाध्ययनविषये चर्च्यते।

### क. ग्रहणाध्ययनम् - आरम्भकालः

प्रतिवर्षं ग्रहणाध्ययनारम्भः श्रावणमासस्य पौर्णमास्यां भवति। तस्मिन् दिने गृह्यसूत्रोक्तेन विधिना उपाकर्म कृत्वा ततः वेदाध्ययनस्यारम्भः करणीयः इति आपस्तम्बधर्मसूत्रे प्रस्तूयते- ***श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषं नाऽधीयीत*** [1] इति। इत्थं ग्रहणाध्ययनस्य आरम्भः श्रावणपौर्णमास्याम् उपाकर्मणः पश्चाद्भवति। अयं ग्रहणाध्ययनस्यारम्भः कालः।

### ख. ग्रहणाध्ययनस्य समापनकालः

प्रतिवर्षं ग्रहणाध्ययनस्य समापनकालत्वेन पुष्यमासस्य पौर्णमासी अथवा पुष्यपौर्णमास्याः पूर्वा रोहिणी (रोहिणीनक्षत्रयुक्ताहनि) उच्यते। तस्यां पुष्यमासस्य पौर्णमास्यां अथवा पुष्यपौर्णमास्याः पूर्वायां रोहिण्यां (रोहिणीनक्षत्रयुक्ताहनि) ग्रहणाध्ययनं विरमेदिति आपस्तम्बधर्मसूत्रे सूच्यते - **तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेत्**[2] इति।

### ग. धारणाध्ययनस्य वेदाङ्गानां चाध्ययनकालः

उत्सर्जनादूर्ध्वम् उपाकरणादर्वाक् यः कालः वर्तते, सः अपर्तुः भवति। ग्रहणाध्ययनस्य युक्तात् पञ्चमासात्मककालाद्भिन्नः शिष्टः सप्तमासात्मकः कालः यः भवति सः अपर्तुः भवतीति फलितार्थः। अर्थत् पौषपौर्णमासी प्रभृति श्रावणपौर्णमासीपर्यन्तं यः सप्तमासात्मकः कालः वर्तते, सः अपर्तुशब्देन ज्ञायते। अस्मिन् अपर्तुकाले अनधीतस्य वेदस्याध्ययनं नैव कर्तव्यमिति सूच्यते- ***अननूक्तं चाऽपर्तौ छन्दसो नाऽधीयीत*** [3] इति। अर्थात् एतावन्तं कालं ग्रहणाध्ययनं न कर्तव्यम्। धारणाध्ययने (अधीतवेदस्याध्ययने) तु न दोषः। अनध्ययनसन्दर्भान् विहाय धारणाध्ययनं (अधीतवेदाध्ययनं) सर्वकालेषु प्रदोषेषु च कर्तुं शक्यते इति सूच्यते- ***सार्वकालिकमाम्नातम्***[4] इति।

इत्थम् अनधीतवेदस्याध्ययनं तावत्प्रतिवर्षं श्रावणपौर्णमासीमारभ्यः पौषपौर्णमासीपर्यन्तं पञ्चसु मासेषु करणीयं भवति। ततः शिष्टेषु सप्तसु मासेषु षडङ्गानां शिक्षाव्याकरणादीनाम् अन्येषां शास्त्राणाञ्च अध्ययनं

प्रचलति। एवं धारणाध्ययनकालः आपस्म्बधर्मसूत्रे निरूपितः। अग्रे प्रत्यहं वेदाध्ययनस्यारम्भे अवधेयाः शैक्षिकनियमाः प्रदर्श्यन्ते।

### घ. वेदाध्ययनस्यारम्भे अवधेयाः नियमाः

प्रत्यहं वेदाध्ययनस्यारम्भे अवधेयाः शैक्षिकनियमाः अपि केचन धर्मसूत्रेषु निरूपिताः। सर्वदा गुरोराज्ञां लब्ध्वा, ततः ***अधीहि भोः*** इत्यादिना गुरुं सूचयित्वैव धारणाध्ययनं अधीयीतेति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोरुच्यते- ***गुरुसन्निधौ चाधीहि भो इत्युक्त्वाऽधीयीत***[5] इति। तथैव अध्ययनस्यादौ (अन्ते च) गुरोः चरणोपसंग्रहणं कर्तव्यमिति, तत एव अध्ययनं कुर्वीत इति च आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः सूच्यते- ***उभयत उपसंग्रहणमधिजिगां -समानस्याधीत्य च***[6] इति।

पुनश्च, यावदसौ अध्यापकः अध्यापयति तावत्पर्यन्तं गुरोः चरणोपसंग्रहणं कर्तव्यमिति सूच्यते- ***समादिष्टमध्यापयन्तं यावदध्ययनमुपसंगृह्णीयात्***[7] इति।

किञ्च, ओङ्कारमादौ कृत्वैव वेदम् अध्येतुम् ब्रह्मचारी उपक्रमेत- ओंङ्कारस्स्वर्गद्वार तस्माद्ब्रह्माऽध्येष्यमाणा एतदादि प्रतिपद्येत[8]।

शुश्रूषां विना शिष्यः कठिनं ग्रन्थं नाऽधीयीतेति, आचार्योऽपि नाध्यापयेदिति च आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः प्रस्तूयते- ***नाऽसमयेन कृच्छ्रं कुर्वीत त्रिःश्रावणं त्रिस्सहवचनमिति परिहाप्य***[9] इति। इथं वेदस्य अध्ययनसम्बध्दाः शैक्षिकनियमाः प्रदर्शिताः। अग्रे वेदस्य अनध्ययननियमाः प्रदर्श्यन्ते।

## 2. वेदस्य अनध्ययनविचारः

ग्रहणाध्ययनं तावद् वर्षे श्रावणपौर्णमासीमारभ्य पौषपौर्णमासीं यावत् पञ्चमासपर्यन्तमेव कार्यमिति[10], धारणाध्ययनन्तु (अधीतवेदाध्ययनम्) आवर्षं सर्वकालेषु प्रदोषेषु च कर्तुं शक्यते इति ज्ञातम्[11]।

एवं अनधीतपूर्ववेदस्याध्ययनं पञ्चमासपर्यन्तम्, अधीतपूर्व-वेदस्याध्ययनम् आवर्षं यद्यपि कर्तुं शक्यते, तथापि तत्र केचन एतादृशाः सन्दर्भाः भवन्ति, येषु वेदस्य अध्ययनं नैव करणीयं भवति। एतादृश एव सन्दर्भः अनध्ययनत्वेन ज्ञायते। यस्मिन् दिने अनध्ययनत्वमुक्तं, तस्मिन् दिने वेदस्याध्ययनं नैव करणीयं भवति।

तदिदम् अनध्ययनं वेदाध्ययनं प्रत्येव भवति। न पुनर्मन्त्राणां यज्ञयागादौ उपयोगे इति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः सूच्यते- ***विद्यां प्रत्यनध्यायः श्रूयते न कर्मयोगे मन्त्राणाम्*** [12] इति। अनध्ययनमिदं केवलं विद्याग्रहणसन्दर्भे वेदाध्ययनं प्रत्येव भवतीति फलितार्थः।

### क. ग्रहणाध्ययनस्य आरम्भ–विरमणयोः अनध्यायविचारः

ग्रहणाध्ययनारम्भ–विरमणयोः समययोः अनध्यायत्वमुक्तम्। वेदस्य अध्ययनारम्भदिनात् श्रावणपौर्णमास्याः आरभ्य मासमेकं प्रदोषे प्रथमे रात्रिभागे अध्ययनं न कुर्यात्। तत ऊर्ध्वं रात्रावपि अध्ययने न दोषः इति सूच्यते- ***श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषं नाऽधीयीत***[13] इति। श्रावणपौर्णमास्यां सर्वविद्याः अध्येतुमारभ्य ततः तस्मिन्नहन्यध्ययनं न कर्तव्यमिति सूच्यते- ***सर्वविद्यानामप्युपनिषदामुपाकृत्याऽनध्ययनं तदहः***[14] इति।

किञ्चान्यत्र ग्रहणाध्ययनस्य वैरमणे उत्सर्जने, औपाकरणे उपाकरणे च त्र्यहाः अनध्ययनत्वेन प्रोक्ताः वर्तन्ते- ***वैरमणे गुरुष्वष्टाक्य औपाकरणा इति त्र्यहाः***[15] इति। अत्र ग्रहणाध्ययनस्योत्सर्जने आरम्भे च पूर्वेद्युः, अपरेद्युः, तच्च दिनम् त्रीणि दिनानि अनध्ययनानि भवन्ति। तत्र वेदस्य अध्ययननियमानाधृत्य श्रावणपौर्णमास्याः पूर्वेद्युः अनध्यायः भवति। उपर्युक्तसूत्रम्[16] तस्मिन् दिने अनध्यायत्वसंपादकं भवति। एवं पूर्वेद्युः, अध्ययनारम्भदिने अनध्याय एव। परन्त्वस्मिन् सूत्रे विशेषस्तु अपरेद्युः अपि अनध्ययनं नियम्यते इति फलितार्थः। इत्थं ग्रहणाध्ययनारम्भे, समापने च दिनत्रयं यावत् अनध्ययनं पालनीयमिति निर्दिष्टम्।

## ख. अनध्ययनतिथयः

वेदस्य अध्ययने काश्चन तिथयः अनध्ययनतिथित्वेन उपवर्णिताः। पौर्णमासी, अष्टमी, अमावास्या, चतुर्दशी, प्रतिपदिति तिथिषु अनध्ययनं भवतीति त्रिषु धर्मसूत्रेषु सूचितं वर्तते। तत्र बोधायनधर्मसूत्रे तु– ***पौर्णमास्यष्टकामावस्या***[17]------ इत्यादिना, -------***पर्वसु च नाधीयीत***[18] इत्यादिना च पर्वद्वयाभ्यां पौर्णमास्यमावासीभ्यां सहैव अष्टमी चतुर्दशी प्रतिपच्चेति तिथयः अनध्ययनत्वेन सूचिताः। अत्र पर्वसु इति शब्दस्याशयस्तु- पर्वस्विति बहुवचनात् बह्व्यस्तिथयो गृह्यन्ते। एका तावत्पर्वद्वयमध्यगता अष्टमी। उभयोरपि पर्वणोरभितस्तिथिद्वयं चतुर्दशी प्रतिपच्चेति। अतोऽष्टमीद्वयं चतुर्दशीद्वयं प्रतिपदद्वयं च गृहीतं भवति[19]।

परन्तु आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः अमावास्यायां तत्पूर्ववर्तिन्याम् एव चतुर्दश्यां तथैव फाल्गुन–आषाढ–कार्तीकमासानामेव पौर्णमास्यां, तत्परवर्तिन्यामेव प्रतिपदि च अनध्ययनं भवतीति निर्दिष्टम्। तत्र अमावास्यासु द्वौ अहोरात्रौ नाऽधीयीत पूर्वेद्युश्चतुर्दश्या सहेति आपस्तम्बहिरण्यकेशिसूत्रयोः निरूप्यते- ***अहोरात्रौ अमावास्यासु***[20] इति। अर्थात् अमावास्यासु द्वौ अहोरात्रौ अमावास्या, तत्पूर्वेद्युः चतुर्दशी इति तिथ्योः अनध्ययनं पालनीयं भवति।

एवमेव फाल्गुन–आषाढ–कार्तिकमासानामेव पौर्णमास्यां, तत्परवर्तिन्यामेव प्रतिपत्तिथौ च अध्ययनं न करणीयमिति, न तु सर्वासां पौर्णमास्यां पतिपादौ इति सूच्यते- ***चातुर्मासीषु च***[21] इति। चतुर्षु मासेषु भवाश्चातुर्मास्यः। संज्ञैषा तिसृणां पौर्णमासीनां यासु चातुर्मास्यानि क्रियन्ते। काः पुनस्ताः? फाल्गुन्याषाढीकार्तिक्यः। चातुर्मास्यो यज्ञः। तासु चातुर्मासीषु पूर्ववद् द्वौ अहोरात्रौ अनध्यायः। पौर्णमास्यनन्तरप्रतिपत्सु च शास्त्रान्तरवशादनध्यायः।

एवम् आपस्तम्बहिरण्यकेशिधर्मसूत्रयोरनुसारम् अमावास्यायां तत्पूर्ववर्तिन्यामेव चतुर्दश्याम् अनध्ययनं भवतीति ज्ञायते। अर्थात् अमावास्यायां तत्पूर्वेद्युश्च अनध्ययनं भवतीति ज्ञायते। तथैव फाल्गुन–आषाढ–कार्तिकमासानामेव पौर्णमास्यां, तपरवर्तिन्यामेव प्रतिपत्तिथौ च अनध्ययनमिति च ज्ञायते। न तु सर्वासां पौर्णमास्यां प्रतिपदि चेति। इत्थम् अनध्ययनतिथयः बोधायनधर्मसूत्रे अविशेषेण, आपस्तम्बहिरण्यकेशिधर्मसूत्रयोस्तु विशेषेण प्रोक्ताः।

किमर्थमेतादृशासु तिथिषु अनध्याय इत्युक्ते बोधायनधर्मसूत्रे उच्यते-

***हन्त्यष्टमी ह्युपाध्यायं हन्ति शिष्यं चतुर्दशी।***
***हन्ति पञ्चदशी विद्यां तस्मात्पर्वाणि वर्जयेत्***[22]।।

उपाध्यायहनने तदलाभकृतो विघ्नो लक्ष्यते। एवं शिष्यहननेनाऽपि तदध्येत्रभावकृतः। विद्याहननेनाऽपि पुरुषान्तरनैरपेक्ष्याभावो लक्ष्यते। अन्योऽप्यध्ययनविघ्नसद्भावो द्रष्टव्यः। अत्यन्तनिश्रेयससत्वादध्ययनस्य विघ्नसन्ततिरवश्यम्भाविनी। सा च तद्वर्जनेनैव परिहरणीया[23]। एवमनध्ययनतिथयः प्रोक्ताः।

### ग. सन्ध्यकालयोः अध्ययनस्य निषेधः

सन्ध्ययोरुभयोरपि अनध्ययनमेवेति बोधायन-आपस्तम्ब-हिरण्यकेशिधर्मसूत्रेषु सूच्यते- ***अहोरात्रयोस्सन्ध्ययो***[24]------- ***सन्ध्योः***[25] इति। एवमविशेषरूपेण सर्वयोरुभयोः सन्ध्ययोः अध्ययनं निषिद्धम्।

### घ. मार्गादिषु अध्ययननिषेधः

निगमेषु (चौराहों पर), ग्रामनिर्गमनागममार्गेषु सर्वप्रकारकमध्ययनं वर्जयेदिति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः प्रस्तूयते- ***निगमेष्वध्ययनं वर्जयेत्***[26] इति। ग्रामारण्ययोः सन्धिदेशेषु, महापथे च अनध्ययनमिति तत्रैव संसूच्यते- ***ग्रामारण्ययोश्च सन्धौ महापथे च***[27]----- इति। एवं निगमेषु, ग्रामनिर्गमनागममार्गेषु, ग्रामारण्ययोः सन्धिदेशेषु, महापथे च अध्ययनं निषिद्धम्। तथापि एतेषु मार्गादिषु अपि गोमयालिप्तप्रदेशे तु अध्ययनं कर्तुं शक्यते- ***आनडुहेन वा शकृत्पिण्डेनोपलिप्तेऽधीयीत***[28] इति।

### ङ. श्मशानादौ अध्ययननिषेधः

श्मशानादौ अध्ययननिषेधः धर्मसूत्रेषु वर्णितः। श्मशाने अध्ययनं वर्जयेदिति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोरुच्यते- ***श्मशाने सर्वतः शम्याप्रासात्***[29] इति। न केवलं श्मशाने वेदस्य अनध्ययनमुक्तम्, अपि तु तत्र गमनेऽपि एकोऽहः अनध्ययनत्वेनोक्तः बोधायनधर्मसूत्रे- ***भूमिकम्पश्मशान***[30] इति। श्मशानं शवशयनम्, शरीरस्य दहनभूमिः निक्षेपभूमिर्वा। तत्र गमनदिवसेऽपि[31] अनध्यायः एव। एवं श्मशाने[32], श्मशानगमने[33] च अनध्ययनमुक्तम्।

### च. शवसन्निधाने अध्ययननिषेधः

श्मशाने[34] इव, श्मशानगमने[35] इव शवसन्निधानेऽपि अध्ययननिषेधः आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः उपवर्णितः। यत्र ग्रामे शवः भवति तत्र वेदं नाध्येयमिति सूच्यते- ***अन्तश्शवम्***[36] इति। तथैव अन्यस्माद् ग्रामाद् यदा शवाः प्रकृतग्रामस्य सीम्नि अभिनिस्सृताः आनीताः भवन्ति तदापि तत्र ग्रामे वेदं नाध्येयमिति समुपवर्ण्यते- ***अभिनिस्सृतानां तु सीम्न्यनध्यायः***[37] इति।

किञ्च अरण्येऽपि यावत्पर्यन्तं शवः सन्दृश्यते तावत्पर्यन्तमनध्यायः एवेति[38] आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः सूच्यते। इत्थं शवसन्निधानेऽपि वेदाध्ययनं निषिद्धमिति प्रतिपादितम्।

### छ. ग्रहणादिषु विद्यानां सर्वासां अध्ययननिषेधः

सर्वासां विद्यानाम् अध्ययननिषेधः अपि धर्मसूत्रेषु परामृष्टः। सर्वासां विद्यानां तावत् सूर्यचन्द्रमसोः ग्रहणे, भूकम्पे, निर्घाते, उल्कापाते, ग्रामादिदाहेषु च सार्वकालिकम् ऋतौ अपर्तौ च आकालमपरेद्यु अध्ययनं प्रतिषिद्धमिति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः सूच्यते–

***सूर्यचन्द्रमसोर्ग्रहणे भूमिचलेऽपस्वान उल्कायामग्न्युत्पाते च सर्वासां विद्यानां सार्वकालिकमाकालम्***[39] इति।

## उपसंहारः

शिक्षा ज्ञानार्जनाय कल्पिता काचन प्रक्रिया। प्रक्रियायाः अस्याः सुचारुरूपेण सञ्चालनाय नियमाः केचन अत्यन्तम् अपेक्षिताः सन्ति। शैक्षिकनियमानामुल्लेखनं यद्यपि बहुत्र दृश्यते परन्तु धर्मसूत्रेषु धर्मशास्त्रेषु च तेषामुल्लेखनं विशिष्यते। पुनस्तत्रापि धर्मसूत्राणि विशिष्यन्ते धर्मशास्त्राणां धर्मसूत्रानुयायित्वादिति कृत्वा प्रकृते लेखे शैक्षिकनियमाः प्रमुखाः प्रदर्शिताः। तत्र ग्रहणाध्ययनस्य धारणाध्ययनस्य च विशिष्टाः नियमाः सन्तीति, शिक्षादीनां तदन्यशास्त्राणाम् अध्ययनेन सम्बद्धनियमाः, अनध्ययनतिथयः इत्यादिशैक्षिकनियमाः प्राचीनकाले परिपालिता इति शम्।

## पादटिप्पण्यः

1. आप. 1.3.9.1

2. आप. 1.3.9.2

3. आप. 1.3.11.31

4. आप. 1.3.11.33

5. आप. 1.3.10.15 हि. 26.3.43

6. आप. 1.3.10.17 हि. 26.3.44

7. आप. 1.4.13.13 हि. 26.4.27

8. आप. 1.4.13.6 हि. 26.4.20

9. आप. 1.3.9.10 हि. 26.4.24

10. आप. 1.4.13.10 हि. 26.3.1,2

11. आप. 1.3.11.31,33 हि. 26.3.86,88

12. आप. 1.4.12.9 हि. 26.4.9

13. आप. 1.3.9.1 हि. 26.3.1

14. आप. 2.2.5.1 हि. 27.1.81

15 आप. 1.3.10.2 हि. 26.3.31

16. आप. 2.2.5.1 हि. 27.1.81

17. बो. 1.11.21.6

18. बो. 1.11.21.19

19. बो. 1.11.21.19 वृत्तिः

20. आप. 1.3.9.28 हि. 26.3.29

21. आप. 1.3.10.1 हि. 26.3.30

22. बो. 1.11.21.24

23. बो. 1.11.21.24 वृत्तिः

24. बो. 1.11.21.19

25. आप.1.3.11.13 हि. 26.3.68

26. आप.1.3.9.4 हि. 26.3.4

27. आप.1.3.11.9 हि. 26.3.66

28. आप.1.3.9.5 हि. 26.3.5

29. आप.1.3.9.6 हि. 26.3.6

30. बो. 1.11.21.6

31. बो. 1.11.21.6 वृत्तिः

32. आप. 1.3.9.5 हि. 26.3.5

33. बो. 1.11.21.6

34. आप. 1.3.9.5 बि. 26.3.5

35. बो. 1.11.21.6

36. आप.1.3.9.14 हि. 26.3.14

37. आप.1.3.9.16 हि. 26.3.16

38. आप.1.3.9.17 हि. 26.3.17

39. आप. 1.3.11.26 हि. 26.3.80

## उपयुक्तग्रन्थाः

आपस्तम्बधर्मसूत्रम्

हिरण्यकेशिधर्मसूत्रम्

बोधायनधर्मसूत्रम्

*सहायकाचार्यः (शिक्षाविभागः),*

*राष्ट्रियसंस्कृतसंस्थानम्,*

*श्रीसदाशिवपरिसरः, पुरी (ओडिशा)*